# Shri Mahakala Kavacham

# શ્રી મહાકાલકવચમ્

## Document Information

Text title : Mahakala Kavacham

File name : mahAkAlakavacham.itx

Category : shiva, kavacha

Location : doc_shiva

Transliterated by : Sivakumar Thyagarajan Iyer shivakumar24 at gmail.com

Proofread by : Sivakumar Thyagarajan Iyer, PSA Easwaran

Description/comments : Rudrayamala

Latest update : December 26, 2019

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 28, 2019

*sanskritdocuments.org*

# શ્રી મહાકાલકવચમ્

ॐ શ્રીગણેશાય નમઃ ।
શ્રીભૈરવ ઉવાચ
અથ વક્ષ્યામિ દેવેશિ કવચમ્ મન્ત્રગર્ભકમ્ ।
મૂલમન્ત્રસ્વરૂપં ચ વિશ્વમઙ્ગલકાભિધમ્ ॥ ૧॥

સર્વસમ્પત્પ્રદં ચૈવ મહાકાલસ્ય પાર્વતિ ।
ગુહ્યાતિગુહ્યપરમં મૂલવિદ્યામયં ધ્રુવમ્ ॥ ૨॥

પરમાર્થપ્રદં નિત્યં ભોગમોક્ષૈકકારણમ્ ।
મહાભયહરં દેવિ મહૈશ્વર્યપ્રદં શિવે ॥ ૩॥

કવચસ્યાસ્ય દેવેશિ ઋષિર્ભૈરવ ઈરિતઃ।
અનુષ્ટુપ્છન્દ ઇત્યુક્તં મહાકાલશ્ચ દેવતા ॥ ૪॥

કૂર્ચબીજં પરાશક્તિસ્તારં કીલકમીરિતમ્ ।
ધર્માર્થકામમોક્ષાર્થે વિનિયોગઃ પ્રકીર્તિતઃ॥ ૫॥

અથ ધ્યાનમ્ ।
શ્યામવર્ણં મહાકાયં મહાકાલં ત્રિલોચનમ્ ।
નીલકણ્ઠં સ્વતેજસ્કં નેત્રત્રયવિભૂષિતમ્ ॥ ૬॥

ખટ્વાઙ્ગચર્મધરં દેવં વરદાભયપાણિકમ્ ।
શૂલહસ્તં ચ ખટ્વાઙ્ગધારિણં મન્ત્રનાયકમ્ ॥ ૭॥

પિનાકહસ્તં દેવેશં તોમરં બિભ્રતં વિભુમ્ ।
પ્રાતઃ પઠેત્સહસ્રં વૈ ભૈરવં તુ સદા સ્મરેત્ ।
એવં વિધેન ધ્યાનેન મનસા ચિન્તયેદ્વિભુમ્ ॥ ૮॥

અથ કવચમ્ ।
ॐ હ્રૂં શિરઃ પાતુ મે કાલઃ લલાટે હ્રીં સદા મમ ।
હ્રૂં કારકં પ્રતીચ્યાં મે બીજદ્વયસ્વરૂપિણી ॥ ૧॥

હ્રીં પાતુ લોચનદ્વન્દ્વં મુખં હ્રીમ્બીજરૂપિણિ ।
હ્રીં કારકં કણ્ઠદેશે હ્રીં પાતુ સ્કન્ધયોર્મમ ॥ ૨॥

મહાકાલઃ સદા પાતુ ભુજૌ સવ્યે નસૌ મમ ।
હ્રીઙ્કારં હૃદયં પાતુ હ્રૂં મેઽવ્યાદુદરં સદા ॥ ૩॥

હ્રીં નાભિં પાતુ સતતં દેવી હ્રીઙ્કારરૂપિણી ।
અવ્યાન્મે લિઙ્ગદેશં ચ હ્રીં રક્ષેદ્ગુહ્યદેશકે ॥ ૪॥

કૂર્ચયુગ્મં પાતુ પાદૌ સ્વાહા પાદતલં મમ ।
શ્રીષોડશાક્ષરઃ પાતુ સર્વાઙ્ગે મમ સર્વદા ॥ ૫॥

અન્તર્વહ્નિશ્ચ માં પાતુ દેવદત્તશ્ચ ભૈરવઃ।
નગલિઙ્ગામૃતપ્રીતઃ સર્વસન્ધિષુ રક્ષતુ ॥ ૬॥

મહોગ્રો માં સદા પાતુ મમેન્દ્રિયસમૂહકમ્ ।
શિવો મમેન્દ્રિયાર્થેષુ રક્ષયેદ્દક્ષિણેષ્વપિ ॥ ૭॥

મહાકાલઃ પશ્ચિમેઽવ્યાદ્દક્ષિણે દેવદત્તકઃ।
ભગલિઙ્ગામૃતં પ્રીતો ભગલિઙ્ગસ્વરૂપકઃ॥ ૮॥

ઉદીચ્યામૂર્ધ્વગઃ પાતુ પૂર્વે સમ્હારભૈરવઃ।
દિગમ્બરઃ શ્મશાનસ્થઃ પાતુ દિક્ષુ વિદિક્ષુ ચ ॥ ૯॥

ફલશ્રુતિઃ ।
શતલક્ષં પ્રજપ્તોઽપિ તસ્ય મન્ત્રં ન સિધ્યતિ ।
સ શાસ્ત્રજ્ઞાનમાપ્નોતિ સોઽચિરાન્મૃત્યુમાપ્નુયાત્ ॥ ૧૦॥

મન્ત્રેણ મ્રિયતે યોગી રક્ષયેત્ કવચં તતઃ ।
ત્રિસન્ધ્યં પઠનાદસ્ય કવચસ્ય તુ પાર્વતિ ॥ ૧૧॥

સિદ્ધયોઽષ્ટૌ કરે તસ્ય મહેશ ઇવ ચાપરઃ ।
રૂપેણ સ્મરતુલ્યેષ્ટો  કામિનીનાં પ્રિયો ભવેત્ ॥ ૧૨॥

તસ્માદેતત્સુકવચં ન દેયં યસ્યકસ્યચિત્ ।
ભક્તિયુક્તાય શાન્તાય દાનશીલાય ધીમતે ॥ ૧૩॥

યો દદાતિ સુશિષ્યેભ્યો વશ્યે તસ્ય જગદ્ભવેત્ ।
ગુહ્યાદ્ગુહ્યતરં ગુહ્યં મહારુદ્રેણ ભાષિતમ્ ॥ ૧૪॥

રવૌ ભૂર્જે લિખેદ્બ્રર્મ સ્વયમ્ભૂઃ કુસુમસ્ત્રજા ।
કુઙ્કુમેનાષ્ટગન્ધેન રક્તેન નિજરેતસા ॥ । ૧૫॥

ધારયન્મૂર્ધ્નિ વા બાહૌ પ્રાપ્નુયાત્પરમાં ગતિમ્ ।
ધનકામો લભેદ્વિત્તં પુત્રકામો લભેત્પ્રજામ્ ॥ ૧૬॥

સર્વાન્ રિપૂન્ રણે જિત્વા કલ્યાણી ગૃહમાવિશેત્ ।
યસ્ય કણ્ઠગતં તસ્ય કરસ્થાઃ સર્વસિદ્ધયઃ ॥ ૧૭॥

શ્રીવિશ્વકવચં નામ કવચં ન પ્રકાશયેત્ ।
રહસ્યાતિરહસ્યં ચ ગોપનીયં સ્વયોનિવત્ ॥ ૧૮॥

ઇતિ શ્રીરુદ્રયામલે તન્ત્રે વિશ્વમઙ્ગલં નામ મહાકાલકવચં સમ્પૂર્ણમ્ ।

Encoded by Sivakumar Thyagarajan Iyer shivakumar24 at gmail.com
Proofread by Sivakumar Thyagarajan Iyer, PSA Easwaran

*Shri Mahakala Kavacham*
pdf was typeset on December 28, 2019

Please send corrections to *sanskrit@cheerful.com*